# ॥ श्रीमूकाम्बिका स्तोत्रम् ॥

मूलाम्भोरुहमध्यकोणविलसद्बन्धूकरागोज्ज्वलाम्
ज्वालाजालजितेन्दुकान्तिलहरीमानन्दसन्दायिनीम् ।
एलालालितनीळकुन्तलधरां नीलोत्पलाभाम्शुकाम्
श्रीकोलाद्रिनिवासिनीं भगवतीं ध्यायामि मूकाम्बिकाम् ॥१ ॥

बालादित्यनिभाननां त्रिनयनां बालेन्दुना भूषिताम्
नीलाकारसुकेशिनीं सुललितां नित्यान्नदानप्रियाम् ।
शंखं चक्रगदाभयांश्च दधतीं सारस्वतार्थप्रदाम्
तां बालां त्रिपुरां शिवेन सहितां ध्यायामि मूकाम्बिकाम् ॥२ ॥

मध्याह्नार्कसहस्रकोटिसदृशां मायान्धकारच्छिदाम्
मध्यान्तादिविवर्जितां मदहरां मारेण संसेविताम् ।
घण्टापाशकपालपुस्तकधरां शुद्धार्थविज्ञानदाम्
तां बालां त्रिपुरां शिवेन सहितां ध्यायामि मूकाम्बिकाम् ॥३ ॥

सन्ध्यारागसमाननां त्रिनयनां सन्मानसैः पूजिताम्
चक्राक्षाभयकम्बुशोभितकरां प्रालम्बवेणीयुताम् ।

ईषत्फुल्लसुकेतकीदललसत्सभ्यार्चितांघ्रिद्वयाम्
तां बालां त्रिपुरां शिवेन सहितां ध्यायामि मूकाम्बिकाम् ॥४ ॥

चन्द्रादित्यसमानकुण्डलधरां चन्द्रार्ककोटिप्रभाम्
चन्द्रार्काग्निविलोचनां शशिमुखीमिन्द्रादिसंसेविताम् ।
मन्त्राद्यन्तसुतन्त्रयोगभजितां चिन्ताकुलध्वम्सिनीम्
मन्दारादि वने स्थितां मणिमयीं ध्यायामि मूकाम्बिकाम् ॥५ ॥

कल्याणीं कमलेक्षणां वरनिधिं वन्दारुचिन्तामणिम्
कल्याणाचलसंस्थितां घनकृपां मायां महावैष्णवीम् ।
कल्यां कम्बुसुदर्शनां भयहरां शम्भुप्रियां कामदाम्
कल्याणीं त्रिपुरां शिवेन सहितां ध्यायामि मूकाम्बिकाम् ॥६ ॥

कालाम्भोधरकुन्तलाञ्चितमुखां कर्पूरवीटीयुताम्
कर्णालम्बितहेमकुण्डलधरां माणिक्यकाञ्चीधराम् ।
कैवल्यैकपरायणां कलिमलप्रध्वंसिनीं कामिनीम्
कल्याणीं त्रिपुरां शिवेन सहितां ध्यायामि मूकाम्बिकाम् ॥७ ॥

नानाकान्तिविचित्रवस्त्रसहितां नानाविधैर्भूषिताम्

नानापुष्पसुगन्धमाल्यसहितां नानाजनैः सेविताम् ।
नानावेदपुराणशास्त्रविनुतां नानाकवित्वप्रदाम्
नानारूपधरां महेशमहिषीं ध्यायामि मूकाम्बिकां ॥८ ॥

राकातारकनायकोज्ज्वलमुखीं श्रीकामकाम्यप्रदाम्
शोकारण्यधनञ्जनप्रतिनिभां कोपाटवीचन्द्रिकाम् ।
श्रीकान्तादिसुरार्चितां स्त्रियमिमां लोकावलीनाशिनीम्
लोकानन्दकरीं नमामि शिरसा ध्यायामि मूकाम्बिकाम् ॥९ ॥

काञ्चीकिङ्किणिकङ्कणाङ्गदधरां मञ्जीरहारोज्ज्वलाम्
चञ्चत्काञ्चनसत्किरीटघटितां ग्रैवेयभूषोज्ज्वलाम् ।
किञ्चत्काञ्चनकञ्चुके मणिमये पद्मासने संस्थिताम्
पञ्चास्याञ्चितचञ्चरीं भगवतीं ध्यायामि मूकाम्बिकाम् ॥९ ॥

सौवर्णाम्बुजमध्यकान्तिनयनां सौदामिनीसन्निभाम्
शंखं चक्रवराभयानि दधतीमिन्दोः कलां बिभ्रतीम् ।
ग्रैवेयाङ्गदहारकुण्डलधरामाखण्डलाद्यैः स्तुताम्
मायाविन्ध्यनिवासिनीं भगवतीं ध्यायामि मूकाम्बिकाम् ॥१० ॥

श्रीमन्नीपवने सुरैर्मुनिगणैः सेव्यां च विद्याधरैः
मन्दारादि समस्तदेवतरुभिः सम्शोभमानां शिवाम् ।
सौवर्णाम्बुजधारिणीं त्रिनयनां एकादिकामेश्वरीम्
मूकाम्बां सकलेष्टसिद्धिफलदां वन्दे परां देवताम् ॥११ ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]